# धीः

# दुर्लभ बौद्ध ग्रन्थ शोध पत्रिका

# 52

सम्पादक

ङवङ समतेन
कुलपति

एस० एस० बहुलकर
मानद सम्पादक

दुर्लभ बौद्ध ग्रन्थ शोध विभाग
केन्द्रीय तिब्बती अध्ययन विश्वविद्यालय
सारनाथ, वाराणसी

बुद्धाब्द २५५६ वैशाख पूर्णिमा ख्रीस्ताब्द २०१२

## सहायक-मण्डल

| | |
|---|---|
| ठाकुरसेन नेगी | बनारसी लाल |
| ठिनलेराम शाशनी | छेरिंग डोलकर |
| विजयराज वज्राचार्य | रंजन कुमार शर्मा |

५२वाँ अंक, ५५० प्रतियाँ, २०१२

मूल्य : रु० १३०.००

© केन्द्रीय तिब्बती अध्ययन विश्वविद्यालय, सारनाथ, वाराणसी, २०१२

प्रकाशक :

केन्द्रीय तिब्बती अध्ययन विश्वविद्यालय, सारनाथ, वाराणसी २२१ ००७

ISBN: 978-93-80282-18-3

मुद्रक :

सुरभि प्रिन्टर्स
सी० २७/२७३, इण्डियन प्रेस कालोनी
मलदहिया, वाराणसी-२२१ ००२

# Dhīḥ

## Journal of Rare Buddhist Texts Research

# 52

*Editors*

NGAWANG SAMTEN
Vice Chancellor

S. S. BAHULKAR
Honorary Editor

Rare Buddhist Texts Research Department
CENTRAL UNIVERSITY OF TIBETAN STUDIES
SARNATH, VARANASI

B.E. 2556 VAIŚĀKHA PŪRṆIMĀ C.E. 2012

Co-Editors

| | |
|---|---|
| Thakur Sain Negi | Banarsi Lal |
| Thinlay Ram Shashni | Tsering Dolkar |
| Vijay Raj Vajracharya | Ranjan Kumar Sharma |

Vol. LII, 550 copies, 2012

Price : Rs. 130.00

© Central University of Tibetan Studies,
Sarnath, Varanasi, 2012

*Published by:*

Central University of Tibetan Studies,
Sarnath, Varanasi-221 007

ISBN: 978-93-80282-18-3

*Printed by:*

Surabhi Printers
C. 27/273, Indian Press Colony
Maldahia, Varanasi-221 002

# धीः LII

## विषयानुक्रमणी


**स्तोत्र—** 1-9

चित्तमण्डलनमस्कारश्लोकाः

वज्रीस्तुतिः

बौद्धतन्त्रों में आयुर्वेद सामग्री—बनारसी लाल 10-22

दूरतः गुरु-आह्वान 'त्रिकाय-अभिन्न-गुरु-अधिष्ठान शीघ्र विनयन सन्तप्त घोष'
—ञलछेन नमडोल 23-36

त्रिप्रत्ययात्मक गम्भीर-मार्ग नरो[पाद]-षड्धर्म नय-क्रम (4)—छेरिंग डोलकर 37-42

दुर्लभ ग्रन्थों की आधार सामग्री—ठाकुरसेन नेगी 43-64

तिब्बत में पूर्वानूदित सूत्र-तन्त्र परम्परा का परिचय (7)—पेमा तेनजिन 65-76

तान्त्रिक साधना का स्वरूप (1)—रञ्जन कुमार शर्मा 77-86

Yogācāra and Vasubandhu – His Life and Works
—Bhikkhu Pāsādika 87-108

**गुह्यसमाजतन्त्रप्रदीपोद्योतनटीका षट्कोटिव्याख्या (10)** 109-118

**वर्णार्हवर्णबुद्धस्तोत्रम्** 119-162

निबन्धों का संक्षिप्त परिचय (अंग्रेजी-हिन्दी) 163-166

निबन्धों का संक्षिप्त परिचय (तिब्बती) 167-173


•

श्रीमातृचेटविरचितम्

# वर्णार्हवर्णबुद्धस्तोत्रम्

# VARṆĀRHAVARṆABUDDHASTOTRA

of

MĀTṚCEṬA

# Varṇārhavarṇastotra

— Jens-Uwe Hartmann—

[ No complete manuscript of the Varṇārhavarṇa (VAV) is preserved. It is known from a large number of rather fragmentary manuscripts which were found about a hundred years ago along the Silk Road in Central Asia. When D. R. Shackleton Bailey edited the text for the first time in 1950,[1] he recovered 58% of the original Sanskrit text from the manuscripts and reconstructed another 28% from the Tibetan translation. Based on more Central Asian manuscripts Prof. Hartmann could recover 82% of the original text in his own edition published in 1987.[2] The new additions proved most of Shackleton Bailey's tentative retranslations from Tibetan to be wrong, and therefore Prof. Hartmann took a more conservative approach and reconstructed the Sanskrit text only in those cases where the wording appeared practically sure. Since 1987, roughly 140 new Sanskrit fragments became known, most of them preserved in the various European collections of manuscripts from Central Asia and a few found in the nineties of the last century in Afghanistan. They help to retrieve 86% of the original text; including the secure reconstructions slightly over 90% of Mātṛceṭa's hymn is now available in its original wording.

A text-critical edition of all the fragments involves various forms of brackets and other symbols in order to precisely reproduce the state of preservation. It is impossible, however, to transfer all those signs into the Devanāgarī script. Therefore, the following Devanāgarī text dispenses with most of the brackets and retains them only in such cases where the reconstruction is not immediately obvious. Gaps considered impossible to be restored with any certainty are kept and filled with the appropriate metrical symbols. If a reader wants to get an accurate impression of the underlying text-critical edition, he or she is invited to consult the digitalized and searchable version of the Varṇārhavarṇa published at https://www2.hf.uio.no/polyglotta/index.php?page=volume&vid=166. This database also includes the Tibetan translation on which the reconstructions are based. ]

1. "The Varṇārhavarṇastotra of Mātṛceṭa," *Bulletin of the School of Oriental and African Studies* 13 (1950), 671-701,810,947-1003.
2. *Das Varṇārhavarṇastotra des Mātṛceṭa*, Göttingen: Vandenhoeck & Ruprecht 1987.

श्रीमातृचेटविरचिते

# वर्णार्हवर्णे बुद्धस्तोत्रे

## 1. अशक्यस्तवः

क्षेत्राक्षेत्रानभिज्ञेन श्रुतिमात्रानुसारिणा ।
यदवर्णार्हवर्णा मे पुरा मन्देन भाषिताः ॥ 1 ॥

तस्य वाक्पङ्कलेपस्य प्रक्षालनमिदं मया ।
जङ्गमं पुण्यतीर्थं त्वामारभ्यारभ्यते मुने ॥ 2 ॥

मोहान्धेनापराद्धं वा यन्मया वरराशिषु ।
तस्येदं पाप्मनो मेऽस्तु पवित्रमघमर्षणम् ॥ 3 ॥

आनिरोधादनपगं वाक्कर्मद्वयमस्तु मे ।
तवैव वचनं यच्च त्वद्गुणापाश्रयं च यत् ॥ 4 ॥

एतदेव ब्रुवन् ब्रूयां वाग्भेदो वा न मे भवेत् ।
एतावद्धि कथासारमतोऽन्यत् काकवाशितम् ॥ 5 ॥

त्वद्धर्मादेव ते साम्यं त्वत्त एव च लभ्यते।
न गाहन्ते ततोऽन्ये तु सर्वधर्मास्तवान्तिके ॥ 6 ॥

आमुखा बुद्धधर्माश्चेत् सर्वोपरिचराः कृताः ।
भवन्ति याति शेषं च वस्त्ववस्करतामिव ॥ 7 ॥

न तेऽस्ति सदृशः कश्चिदधिके वाक्पथोऽस्ति कः।
अल्पान्तरावकृष्टोऽपि न ते कश्चन विद्यते ॥ 8 ॥

स केनोपनयामि त्वाऽनुपनेयोऽसि नायक ।
हृतोपमावकाशाय नमोऽस्त्वनुपमाय ते ॥ 9 ॥

विमुक्तिसामान्यगतैस्ततोऽन्यैरपि पुद्गलैः ।
तवातुलैर्बुद्धधर्मैरन्तरं सुमहान्तरम् ॥ 10 ॥

को हि सौषिर्यसामान्यात् केवलादविशेषवित् ।
रोमकूपाणुकच्छिद्रेणाकाशं प्रतिबिम्बयेत् ॥ 11 ॥

कः संख्यास्यत्यसंख्येयान् कोऽप्रमेयान् प्रमास्यति ।
नहि संख्याप्रभावाभ्यां व्यवस्थाऽस्ति गुणेषु ते ॥ 12 ॥

न तृप्तिमभिगच्छामि नान्तं सुचरितस्य ते ।
परिभ्रमन्नपर्यन्ते कल्पद्रुमवने यथा ॥ 13 ॥

यदि ताथागता धर्माः स्युरिमे सनिदर्शनाः ।
नाकाशेऽप्यवकाशः स्याद् गुणानां ते गुणार्णव ॥ 14 ॥

त्वद्धर्मसेनापतिना सर्वश्रावककेतुना ।
आनुत्तर्यानुवादेन साक्षात् त्वामुपतिष्ठता ॥ 15 ॥

व्याख्यातमनुयुक्तेन बुद्धधर्मज्ञतां प्रति ।
नेति व्याहरता बुद्धधर्मगाम्भीर्यमव्ययम् ॥ 16 ॥

यदि तेऽपि महानागास्त्वयि व्याहतशक्तयः ।
मादृशस्यावकाशाशा का भवावस्करक्रिमेः ॥ 17 ॥

त्वयैव तु महासाल नामिताभ्योऽनुकम्पया ।
जनोऽयं गुणशाखाभ्यः किञ्चिदेवावलम्बते ॥ 18 ॥

महामेघौघमुक्तानां ग्रीष्मोष्मातापितोऽपि सः ।
कियत् सलिलधाराणां पिबन् पास्यति चातकः ॥ 19 ॥

चतस्रोऽपि महानद्यः स्रवन्त्योऽनवतप्ततः ।
नैनं ग्लपयितुं शक्ताः प्रागेवान्ये परिस्रवाः ॥ 20 ॥

न च नापूर्यते लोको न क्षयं यान्ति चाकराः ।
त्वद्गुणप्रचये नाथ सैव नः संप्रधारणा ॥ 21 ॥

प्रचीय गुणपुष्पाणि त्वन्मतादेव यत्नतः ।
फुल्लं त्वाऽवकरिष्यामि तरुं स्वकुसुमैरिव ॥ 22 ॥

स्वरत्नैराकरमिव स्वधातुभिरिवाचलम् ।
चन्दनं स्वरसेनेव सरः स्वजलजैरिव ॥ 23 ॥

गुणैस्त्वाऽभ्यर्चयिष्यामि त्वन्मतादेव निर्हृतैः।
स्वनिर्वान्तेन हेम्नेव काञ्चनष्ठीविनं मणिम् ॥ 24 ॥

न चोपयोगं सकला शशिप्रभा
प्रयाति विष्वक्प्रसृता नभस्तलात् ।
न [–⏑––]प्रतिपातबो[⏑–]
[⏑–⏑––⏑⏑–⏑–⏑x] ॥ 25 ॥

तथा च नामेय[⏑–⏑]संपदो
मुनीन्द्रवर्णार्णवपारमस्ति ते ।
[⏑–⏑––⏑⏑–⏑–⏑–]
जनो न नेष्टेन फलेन युज्यते ॥ 26 ॥

[वा]चः साफल्यं जन्म[––]पसारं
मार्गो निर्द्वन्द्वः स्वर्भ[⏑––⏑––]।
श्रद्धादीनां [––⏑––⏑––
–––]श्चातो बुद्धवर्णानुवादः ॥ 27 ॥

बुद्धस्तोत्रग्रन्थ[न]व्यापृतानां
भक्तिप्रह्वेष्विन्द्रियेषु द्रवत्सु ।
एकैकस्मिन् यः क्षणे धर्मवेगो
नासर्वज्ञस्तं प्रमातुं समर्थः ॥ 28 ॥

सत्यां शक्तौ चञ्चलायां प्रवृत्तौ
संपद्योगस्यास्य चात्यद्भुतत्वात् ।
येषामस्यां नाभियोगः क्रियायां
का नामान्या वञ्चनातः परं स्यात् ॥ 29 ॥

**वर्णार्हवर्णे बुद्धस्तोत्रेऽशक्यस्तवो नाम प्रथमः परिच्छेदः ॥ 1 ॥**

•

## 2. मूर्धाभिषेकस्तवः

यथैवावेक्षितस्तेऽहं त्वद्भक्तिप्रवणेन्द्रियः ।
तिष्ठता करुणार्द्रेण बुद्ध बौद्धेन चक्षुषा ॥ 1 ॥

तामेवात्मगतां तेऽहमामुखी भावयन् दयाम् ।
साक्षादिव करोम्येष नमोऽर्हाय नमोऽस्तु ते ॥ 2 ॥

असर्ववित् सर्वविदं कः कथं त्वावभोत्स्यते।
स्वयंविदितमाहात्म्यविस्तराय नमोऽस्तु ते ॥ 3 ॥

अयमेवंविधश्चासीत्यगतिर्मादृशस्य सा ।
यश्चासि यादृशश्चासि तादृशाय नमोऽस्तु ते ॥ 4 ॥

यादृ[xx]स्वयं नाथ यादृशास्त्वादृशा जिनाः।
[xxxx⏑––x]तादृशाय नमोऽस्तु ते ॥ 5 ॥

यथा वेत्स्यात्मनाऽऽत्मानं यथा त्वा त्वादृशा विदुः।
यथा[xx⏑––x] तादृशाय नमोऽस्तु ते ॥ 6 ॥

यथा ते स्वयमेवात्मा गुणैर्दशबलादिभिः ।
आविष्कृतः करुणया तादृशाय नमोऽस्तु ते ॥ 7 ॥

अत एवाभिनिर्हृत्य त्वद्गुणाकरसारताम् ।
यथाशक्ति करिष्याम इत ऊर्ध्वं नमोऽस्तु ते ॥ 8 ॥

नमोऽर्हते नमस्तेऽस्तु नमस्तेऽस्तु नमोऽर्हते ।
नमो नमो नमस्तेऽस्तु नमस्तेऽस्तु नमोऽर्हते ॥ 9 ॥

नमः संबुद्धरत्नाय धर्मरत्न[⏑–⏑x] ।
संघरत्नाकरायास्तु त्रिरत्नसमवायिने ॥ 10 ॥

रूपरत्नात्मभावाय चित्तरत्नान्तरात्मने ।
धर्मरत्नाकरायास्तु सर्वरत्नाय ते नमः ॥ 11 ॥

सर्वरत्नाग्रभूताय सर्वरत्नाभिभाविने ।
सर्वरत्नाकरायास्तु सर्वरत्नाय ते नमः ॥ 12 ॥

नमस्ते रूपरत्नाय चित्तरत्नाय ते नमः ।
नमस्ते धर्मरत्नाय सर्वरत्नाय ते नमः ॥ 13 ॥

अनताय नमस्तुभ्यं नमस्कारार्ह तेऽर्हते ।
भावतोऽस्तु भवाभावभावनाभावितात्मने ॥ 14 ॥

अनतिक्रमणीयाय संपत्पर्यन्तवर्तिने ।
अनुत्तराय श्रमणमर्यादाय नमोऽस्तु ते ॥ 15 ॥

सर्वाकारोपपन्नाय सर्वशोभाभिभाविने ।
सर्वर्तुरमणीयाय बुद्धपद्माय ते नमः ॥ 16 ॥

सुवर्णाय सुगन्धाय दर्शनीय[⏑–⏑x] ।
संबुद्धपुण्डरीकाय फुल्लायाम्लायिने नमः ॥ 17 ॥

प्रश्रब्धिसुखमण्डस्य निकामं स्पर्शलाभिने ।
[x–⏑]ताय श्रमणसुकुमाराय ते नमः ॥ 18 ॥

श्रमसाफल्यसाकल्यमनुप्राप्ताय नैष्ठिकम् ।
सत्समाख्याप्रतिज्ञाय श्रमणाय नमोऽस्तु ते ॥ 19 ॥

उषितब्रह्मचर्याय वेदवेदाङ्गवेदिने ।
विद्याचरणशुद्धाय ब्राह्मणाय नमोऽस्तु ते ॥ 20 ॥

असंहार्यार्यधर्माय पुरस्कार्यार्यकर्मणे ।
आर्याय कृतकार्याय लोकाचार्याय ते नमः ॥ 21 ॥

तपोव्रतसमादानपवित्रीकृतचेतसे ।
निष्णातसर्वपापाय स्नातकाय नमोऽस्तु ते ॥ 22 ॥

अग्र्याधिपत्यप्राप्ताय सर्वसत्त्वाभिभाविने ।
विघुष्टसिंहनादाय नृसिंहाय नमोऽस्तु ते ॥ 23 ॥

महापदावदानाय सद्धर्मोच्चनिषेविणे ।
सर्वारदितधर्माय महानागाय ते नमः ॥ 24 ॥

अविषह्यां त्वदन्येन धर्मतोत्कृष्टगौरवाम् ।
धुरमुद्यम्य याताय लोकधुर्याय ते नमः ॥ 25 ॥

सुरताय सुदान्ताय क्षमायाव्यङ्गमूर्तये ।
जववर्णबलोपेतायाजानेयाय ते नमः ॥ 26 ॥

दिक्तीर्थगोचरज्ञाय धीरायाजिह्मगामिने ।
ऋषभायार्षभं स्थानमनुप्राप्ताय ते नमः ॥ 27 ॥

दमथोपायसाकल्यकुशलायाकिलासिने ।
नमः पुरुषदम्यानां सारथिप्रवराय ते ॥ 28 ॥

भव्योऽपि [x⏑––⏑] नान्यत्र तव शासनात् ।
यदतः सकलब्रह्मचर्यभूताय ते नमः ॥ 29 ॥

सम्यक्सुपरिपूर्णत्वात् सर्वासां गुणसंपदाम् ।
प्रतिप्रश्रब्धकुशलधर्मच्छन्दाय ते नमः ॥ 30 ॥

सुसमाप्तात्मकार्याय परकार्याभियोगिने ।
सद्धर्मामृततृप्ताय [xx]राय नमोऽस्तु ते ॥ 31 ॥

[xxअ]पारिमं तीरमनेकभयभैरवम् ।
समुत्तीर्णमहौघाय पारगाय नमोऽस्तु ते ॥ 32 ॥

सर्वक्लेशामयघ्नाय सर्वशल्यापहारिणे ।
सिद्धविद्याधरायास्तु भिषक्च्छ्रेष्ठाय ते नमः ॥ 33 ॥

सदसन्मार्गविदुषे शान्तदिक्प्रतिपादिने ।
योगक्षेम[विभाहा]य सार्थवाहाय ते नमः ॥ 34 ॥

नित्यापोढान्धकाराय नित्योन्मिषितचक्षुषे ।
नित्यासंमोषधर्माय सुविबुद्धाय ते नमः ॥ 35 ॥

निर्धौतमलपङ्काय सद्धर्माम्भसि निर्मले ।
अत्यन्तव्यवदाताय निर्मलाय नमोऽस्तु ते ॥ 36 ॥

प्रहीणपुण्यपापाय शून्यताभावितात्मने ।
समकारापकाराय सुविरक्ताय ते नमः ॥ 37 ॥

निर्वान्तसर्वसंक्लेशवासनामलचेतसे ।
अनावृतविमोक्षाय सुविमुक्ताय ते नमः ॥ 38 ॥

असेचनकरूपाय प्रभाभासुरमूर्तये ।
नमोऽस्तु सर्वदृश्यानां दर्शनीयतमाय ते ॥ 39 ॥

[xxxx ⏑ – – x] महापुरुषलक्षणैः ।
अनुव्यञ्जनसंदोहैः प्रेक्षणीयाय ते नमः ॥ 40 ॥

अनुत्तरैर्बुद्धधर्मैर् वैशारद्यबलादिभिः ।
[xxxx ⏑ – – x] स्पृहणीयाय ते नमः ॥ 41 ॥

भावनाकरकैः शुक्लैरार्यधर्मैरनुत्तरैः ।
भावितोभयकायाय भावनीयाय ते नमः ॥ 42 ॥

एकान्तव्यवदानत्वान्मनोवाक्कायकर्मणाम् ।
रक्षानिवृत्तवृत्ताय शुद्धशौचाय ते नमः ॥ 43 ॥

विरतक्लेशजल्पाय शान्तकर्मान्तचेतसे ।
तूष्णींभावाधि[--x xx]मौनाय ते नमः ॥ 44 ॥

सुखदु:खैरसंहार्यचेतसे स्थिरचेतसे ।
सर्वाभिभाविने सत्त्वसारोत्तमाय ते नमः ॥ 45 ॥

[xxxx ⏑–]तत्वात् सर्वाकारा[⏑–⏑x]।
स्मृतिबुद्ध्योरसंमोषधर्मकाय नमोऽस्तु ते ॥ 46 ॥

लोकोत्तरगुणाढ्याय लोकामिषविनाशिने ।
लोकालोककरायास्तु लोकनाथाय ते नमः ॥ 47 ॥

सममित्रारिमध्याय सर्वसत्त्वहितैषिणे ।
नमोऽनुकम्पकायास्तु महाकारुणिकाय ते ॥ 48 ॥

संपूर्णधर्मसंज्ञाय सर्वाभिज्ञाय तायिने ।
कृतज्ञायाकृतज्ञाय सर्वज्ञाय नमोऽस्तु ते ॥ 49 ॥

हतसर्वावकाशाय च्छिन्नपाशाय सर्वशः ।
कृतप्रज्ञावकाशाय वान्ताशाय नमोऽस्तु ते ॥ 50 ॥

अभिनन्द्याय वन्द्याय प्रतिवन्द्याय यत्नतः ।
अचोद्यायानवद्याय त्रैविद्याय नमोऽस्तु ते ॥ 51 ॥

अहितापोहदक्षाय हिताधानाभियोगिने ।
अनुकम्पैकतानाय सन्मित्राय नमोऽस्तु ते ॥ 52 ॥

सत्पथाभिमुखीकर्तुं कापथप्रसृताः प्रजाः ।
नित्याभियोगिने भद्रबान्धवाय नमोऽस्तु ते ॥ 53 ॥

न ततोऽस्त्युत्तरतरं पदं पदविदां वर ।
यत्पदं त्वमभिज्ञाय द्विपदां श्रेष्ठतां गतः ॥ 54 ॥

अनुत्तरपदज्ञाय सर्वापदपहारिणे ।
अपदायानुपादाय द्विपदाग्राय ते नमः ॥ 55 ॥

त्वच्छासनमनागम्य न कश्चित् तत्त्वमीक्षते ।
अन्धीभूतस्य लोकस्य चक्षुर्भूताय ते नमः ॥ 56 ॥

सति प्रदीपे सत्यग्नौ सत्सु तारामणीन्दुषु ।
अपूर्ण एवार्कमृते प्रकाशो भवति क्षितौ ॥ 57 ॥

तासु चान्यासु चाभासु तद्विशिष्टतमास्वपि ।
सतीष्वेव निरालोकं भवति त्वदृते जगत् ॥ 58 ॥

इत्यविद्यान्धकारोग्रपटलावृतचेतसः ।
तमोभूतस्य लोकस्य ज्योतिर्भूताय ते नमः ॥ 59 ॥

नैवार्थमर्थतो वेत्ति नैवानर्थमनर्थतः ।
अव्युत्पन्नमतिर्धर्मे व्युत्पत्तिश्च त्वदाश्रिता ॥ 60 ॥

प्रायेणानर्थतित्यक्षुरर्थं त्यजति बालिशः ।
अर्थार्थी चापरिज्ञानादनर्थं प्रतिपद्यते ॥ 61 ॥

त्वां तु प्राप्य यथान्यायमुभयोः प्रतिपद्यते ।
तदुपायोपदेष्टृत्वादर्थभूताय ते नमः ॥ 62 ॥

सर्वाकारपरिज्ञानात् सर्वज्ञेयावभासिने ।
ज्ञानालोककरायास्तु ज्ञानभूताय ते नमः ॥ 63 ॥

तेऽपि लोकस्य गुरवो येषामस्यगुरो गुरुः ।
अतो गुरूणामपि ते गुरवे गुरवे नमः ॥ 64 ॥

पूजयन्त्याप्तरूपत्वात् त्वा सन्तो लोकपूजिताः ।
पूज्यानामपि पूज्याय नमः पूज्य[ ⏑–⏑ ]ते ॥ 65 ॥

यान् प्रशस्याः प्रशंसन्ति त्वां प्रशंसन्ति ते जनाः।
प्रशस्यानामपि सतां प्रशस्याय नमोऽस्तु ते ॥ 66 ॥

ऋषयस्त्वां नमस्यन्ति त्वां नमस्यन्ति देवताः।
नमस्यानामपि सतां नमस्याय नमोऽस्तु ते ॥ 67 ॥

कस्य तृप्तिर्भवेज्जातु कुर्वाणस्य सचेतसः ।
अमेयपुण्यक्षेत्राय नमोऽर्हाय नमोऽस्तु ते ॥ 68 ॥

तस्मान्नमो नमस्तेऽस्तु नमस्तेऽस्तु नमोऽर्हते।
अव्युच्छिन्ननमोधारं नमः सततमस्तु ते ॥ 69 ॥

सदा सदाचारविधायिनेऽयिने
क्षराक्षराप्तप्रतिसंविदे विदे ।
महामहायाप्रतिमाय ते यते
नमो नमोऽर्हाय महार्हतेऽर्हते ॥ 70 ॥

नमोऽस्तु तेऽनुपममनोज्ञमूर्तये
नमोऽस्तु ते मधुमधुराभिधायिने ।
नमोऽस्तु ते विमलविबुद्धबुद्धये
नमोऽस्तु ते गुणगणभावितात्मने ॥ 71 ॥

न सर्वयज्ञा न तपोव्रतानि
न सर्वतीर्थानि न मङ्गलानि ।
क्षेत्रज्ञताभावितनिर्मलस्य
बुद्धप्रणामस्य कलां स्पृशन्ति ॥ 72 ॥

प्रथयति यशो धत्ते श्रेयो विवर्धयति द्युतिं
क्षयति दुरितं सर्वं सर्वामरातिमपोहति ।
सुगतिनियतां लोके नृणां करोति च संततिं
फलति च शिवायाऽन्तेऽवश्यं मुनीन्द्रनमस्क्रिया ॥ 73 ॥

एवं बहुगुणं मत्वा मत्वा कायं च भङ्गुरम्।
बुद्धप्रणामात् को विद्वान् कायकर्मान्यदाचरेत्॥ 74॥

अन्तर्हितेऽन्तकनिषूदनशासनेऽस्मिन्
कं सत्करिष्यथ वृते तमसा समन्तात्।
तस्मात् त्वरध्वमसमप्रतिमाननायां
जातान्यनागतभयानि हि सांप्रतानि॥ 75॥

**वर्णार्हवर्णे बुद्धस्तोत्रे मूर्धाभिषेको नाम द्वितीयः परिच्छेदः॥ 2॥**

•

## 3. सर्वज्ञतासिद्धिस्तवः

आदित्यबन्धुमादित्यभाभासुरतरद्युतिम् ।
प्रवरं सर्ववन्द्यानां वन्दे त्वा वन्द्यवन्दितम् ॥ 1 ॥

महाबलं महावीरं महाभिज्ञं महर्द्धिकम् ।
महाहवमहेष्वासं महये त्वा महामहम् ॥ 2 ॥

पूज्यपूज्यतमं लोके लोकपूजितपूजितम् ।
पूजार्हं पूजयामि त्वा पूजाभाजमनुत्तरम् ॥ 3 ॥

आप्तसंमानमानाप्यं निर्मानानुशयाशयम् ।
मानये माननीयं त्वा न्यस्तमानेन चेतसा ॥ 4 ॥

समासत्कारसत्कारं लोकसत्कृतसत्कृतम् ।
सत्कृत्य सत्करोमि त्वा सत्कारावनतेन्द्रियः ॥ 5 ॥

न तेऽस्ति सदृशः कश्चिन्नाभून्न भविताधिकः ।
अतोऽसि सर्वसत्वेषु समासमसमोऽसमः ॥ 6 ॥

सभागः सर्वबुद्धानामसंकीर्णार्यवंशजः ।
वर्णप्रज्ञावभासाभ्यामवभास्योदितो दिशः ॥ 7 ।

द्वात्रिंशल्लक्षणवता व्यामाभाभासुरत्विषा ।
लक्षणानुचराशीतिव्यञ्जनोज्ज्वलवर्चसा ॥ 8 ॥

वपुषा श्रीविशालेन सर्वशोभाभिभाविना ।
अवभास्य स्थितो लोकान् दिवाकर इवापरः ॥ 9 ॥

सर्वे सर्वाध्व[–] धर्माः सर्वाकाराकरास्तव ।
तलामलकवद् बुद्ध बुद्धेरायान्ति गोचरम् ॥ 10 ॥

पृथगेकत्वनानात्वे धर्माणां साक्षरक्षरे ।
न ते व्याहन्यते बुद्धिर्वायोर्गतिरिवाम्बरे ॥ 11 ॥

तथा सुप्रतिविद्धस्ते धर्मधातुः कृतः कृतिम् ।
यच्चित्तोत्पादमात्रेण स्वैरं ते सर्वमृध्यति ॥ 12 ॥

न ते प्रायोगिकं किञ्चित् कुशलं कुशलान्तग ।
इच्छामात्रावबद्धा ते यत्रकामावसायिता ॥ 13 ॥

धर्माणां धर्मसद्भावधर्मताधर्मशक्तयः ।
सहेतुप्रत्यवस्थानाः सप्रत्ययफलाः पृथक् ॥ 14 ॥

सधातुभेदनानात्वाः सापायोपायविस्तराः ।
त्वं सर्वाः सर्वधर्मज्ञ सर्वथाऽवैषि नापरः ॥ 15 ॥

सुतिरस्कृतमप्याविः सुदूरमपि तेऽन्तिके ।
सुगह्वरमपि प्रह्वं सूद्विद्धमपि वामनम् ॥ 16 ॥

सुध्वान्तमपि सालोकं सुद्वैधमपि निश्चितम् ।
सुगम्भीरमपि ज्ञेयमुत्तानोत्तानमेव ते ॥ 17 ॥

न ते जनयते खेदं सुगम्भीरापि धर्मता ।
महेन्द्रस्येव नागस्य नागकक्ष्या हिरण्मयी ॥ 18 ॥

विराग इव धर्माणां निर्याणानामिवाञ्जसः ।
त्वमग्र्यः सर्वसत्वानां बुद्धत्वं संपदामिव ॥ 19 ॥

अको[xx] विमुक्तीनां युक्तीनामिव धर्मता ।
सर्वज्ञतेव प्रज्ञानां त्वमाग्र्यः सर्वदेहिनाम् ॥ 20 ॥

विमुक्तिरिव शुद्धीनां तत्त्वानामिव शून्यता ।
क्षमेव तपसामग्र्यः सर्वप्राणभृतामसि ॥ 21 ॥

त्वद्रूपमिव रूपाणां त्वच्चित्तमिव चेतसाम् ।
त्वद्धर्म इव धर्माणामग्र्यः प्राणभृतामसि ॥ 22 ॥

**वर्णार्हवर्णे बुद्धस्तोत्रे सर्वज्ञतासिद्धिर्नाम तृतीयः परिच्छेदः ॥ 3 ॥**

●

## 4. बलवैशारद्यस्तवः

त्वमेक एक[--x] सर्वधर्मावभासिना ।
सर्वाकारावबोधेन [xxxx ◡-◡x] ॥ 1 ॥

[xxxx ◡--x xxxx ◡]मावृतम् ।
ततोऽन्येषां [◡--x] ज्ञेयमेवातिरिच्यते ॥ 2 ॥

अस्मादिदमिदं नास्माद्धेतुप्रत्ययतः फलम् ।
त्वं स्थानास्थान[--x] कार्त्स्न्येनावैषि नापरः ॥ 3 ॥

कर्मधर्मसमादानविपाकं [x◡-◡x] ।
त्वं सर्वभौमिकं सर्वं सर्वथावैषि नापरः ॥ 4 ॥

ससंक्लेशव्यवस्थानव्यवदानाः सगह्वराः ।
तवैवैकस्य[--x xxx] योगभूमयः ॥ 5 ॥

परापरत्वमक्षाणां मृदुमध्याधिमात्रशः ।
अंशांशभेदशोऽनन्त्यं न त्वदन्योऽवगच्छति ॥ 6 ॥

संस्यन्दन्ते यदन्योन्यं यद् यान्ति विसभागताम् ।
त्वमेको वेत्सि तां कृत्स्नां नृणां नानाधिमुक्तिताम् ॥ 7 ॥

नानाधातुमिमं लोकं धातुनानात्वभेदशः ।
त्वमेको धातुनानात्वसाकल्यं वेत्सि नापरः ॥ 8 ॥

हेतुप्रत्ययवैचित्र्यादभिनिर्वृत्तिचित्रताम् ।
त्वं सर्वां वेत्सि सर्वत्रगामिनीप्रतिपद्बलात् ॥ 9 ॥

**यदनादौ** भवे वृत्तमपर्यन्ते च वर्त्स्यति ।
**प्रत्यक्ष** इव ते तत्र वर्तते ज्ञानदर्शनम् ॥ 10 ॥

समुदागमतो लो[कं xxxx ◡–◡x] ।
[xxxx ◡––x xxxx◡–◡]सि ॥ 11 ॥

सवासनावरणता तथा तेऽन्तर्हिता यथा ।
[xxxx ◡––x xxxx◡–◡x] ॥ 12 ॥॥

इदं वस्त्वपरिज्ञातमस्य क्लेशस्य वासना ।
[xxxx ◡––x] प्राप्तं पदमिदं त्वया ॥ 13 ॥

ये विबन्धास्त्वया प्रोक्ता नियतं ते विबध्नते ।
तदेव चैकं निर्याणं यो मार्गो देशितस्त्वया ॥ 14 ॥

ते नालमन्तरायाय स न निर्यास्यतीति वा ।
न पराक्षेपलेशांशसंभवोऽप्यत्र विद्यते ॥ 15 ॥

न तेऽस्त्यविजितं जय्यं न ज्ञेयमविभावितम् ।
सर्वज्ञः सर्वविजयी त्वमेवेश्वर नापरः ॥ 16 ॥

बलवान् न बिभेतीति युक्तं यदसि निर्व्यथः ।
यन्नेरयसि कंचित्तु सत्यां शक्तौ तदद्भुतम् ॥ 17 ॥

विनयोपायमात्रं तन्न सा बलवि[–◡x] ।
यन्मिथ्यामान[––x xxxx ◡]सं मदात् ॥ 18 ॥

जितं बलवता सर्वमिति लोके यदुच्यते ।
अविवादः स [––x xxxx ◡–◡x] ॥ 19 ॥

[xxxx ◡––x xx] चोदयितुं [◡x] ।
अचोद्यश्चानवद्यश्च क्षेमप्राप्तोऽसि नायक ॥ 20 ॥

च[xxx ◡––x xxxx]न् रतश्च सः ।
चतुर्षु परिपूर्णेषु [xxxx ◡–]द्यसे ॥ 21 ॥

सर्वत्राव्याहतमतिः सर्वत्रोपस्थितस्मृतिः ।
सर्वत्र समकारुण्यः [xxxx ⏑ ]मानसः ॥ 22 ॥

सर्वज्ञेय[ ⏑ – – x ]: सर्वनिर्वान्तवासनः ।
सर्वान्तरायान्तरवित् सर्वनिर्याणकोविदः ॥ 23 ।॥

सर्वसंक्लेशवैचित्र्यप्रति [xx ⏑ – ⏑ x ।
xxxx ⏑ – – x] प्रतिपक्षविशारदम् ॥ 24 ॥

त्वामप्यासाद्य वक्तारः [ xxxx ⏑ ] बालिशः] ।
त [xxx ⏑ – – x xxxx ⏑ – ⏑ x] ॥ 25 ॥

तत्तदावरणं नाम तत्तन्निवरणं परम् ।
त्वद्वा[xx ⏑ – – x xxxx ⏑ – ⏑ x] ॥ 26 ॥

**वर्णार्हवर्णे बुद्धस्तोत्रे बलवैशारद्यस्तवो नाम चतुर्थः परिच्छेदः ॥ 4 ॥**

•

# 5. वाग्विशुद्धिस्तवः

[xxxx ◡––x xxxx◡–◡x ।
xxxx ◡––x xxxx◡–◡x]म् ॥ 1 ॥

श्रुत्वादीनवयुक्तानि यथा वाक्यानि ते मुने ।
[xxxx ◡––x xxxx◡–◡x] ॥ 2 ॥

[xxxx ◡––x xxxx◡–◡x ।
xxxx ◡––x xxxx] वचस्तव ॥ 3 ॥

प[xxx ◡––]न्नमगाधापारमर्थ[x] ।
[xxxx ◡––x किमद्भुततरं ततः] ॥ 4 ॥

[xx] पर्यायनानात्वे युक्तसंस्यन्द[–◡x ।
xxx] पुनरुक्तं च वचस्ते वदतां वर ॥ 5 ॥

चतुःस्थितिगुणोपेतं चतुर्व्याकरणाश्रितम् ।
अर्थे चाद्वयवैपाक्यं वाक्यं ते वदतां वर ॥ 6 ॥

क्वचिद् [xx◡––x xxxx◡–◡x] ।
[xxxx ◡––x xxxx◡–◡x] ॥ 7 ॥

धर्मतत्त्वसमाख्यानादविवादपदाश्रयम् ।
न्यायोपपत्ति[––x xxxx ◡–◡x] ॥ 8 ॥

[xxxx ◡––x xxxx◡–◡x] ।
सत्यद्वयाविरुद्धत्वाद् योगवाहि वचस्तव ॥ 9 ॥

अरणैकान्तमधुरं सरणैकान्तनिष्ठुरम् ।
न च माधुर्यनैष्ठुर्यदोषयुक्तं वचस्तव ॥ 10 ॥

व्यवदानानुकूलं च तत्पक्षपतितं न च ।
संक्लेशप्रत्यनीकं च निरमर्षं च ते वच: ॥ 11 ॥

निन्दापदशताकीर्णं न चापध्यानदोषवत् ।
प्रशंसावचनाढ्यं च न च क्वचन निश्रितम् ॥ 12 ॥

प्रक्षेपापनयापेतं समासव्यास[–⏑] च ।
विमर्शरमणीयं च न च नापातभद्रकम् ॥ 13 ॥

सुसंगीतमसंसक्तं बहु चापेतफल्गु च ।
[xxxx ⏑–]र्थं च बह्वाश्चर्यमिदं वच: ॥ 14 ॥

हारि चारञ्जनीयं च दीप्तमप्रतिघाति च ।
व्यापि चाखलगम्यं च तव वाचस्पते वच: ॥ 15 ॥

[xxxx ⏑––x] स्वेदमापादयत्यपि ।
स्तम्भयत्यपि गात्राणि वेपथुं जनयत्यपि ॥ 16 ॥

संवेजयत्यप्यमरान् [xxxx ⏑–⏑x] ।
षड्विकारमपि स्वस्थामाकम्पयति[–⏑x] ॥ 17 ॥

अनादिकालप्रहता विवर्तयति देहिनाम् ।
प्रकृती: [x⏑––x xxxx⏑–⏑x] ॥ 18 ॥

[xxxx ⏑––x xxxx] मनो नृणाम् ।
सतां तु न्यायवृत्तानाममृतेनेव वर्षति ॥ 19 ॥

[xxxx ⏑––x xxxx⏑–⏑x ।
xxxx ⏑––x] तत्करस्यामृतायते ॥ 20 ॥

किमद्भुततरं तस्मात् किमा[xx⏑–⏑x ।
xxxx ⏑––x xxxx⏑–⏑x] ॥ 21 ॥

[xxxx ⏑ – – x]अनेकेव च लक्ष्यते ।
मदौद्देशिकमेवैतदिति सर्वोऽवगच्छति ॥ 22 ॥

[xxxx ⏑ – – x xxxx]नुवर्तते ।
अनु[xx ⏑ – – x xxxx ⏑ –]तराः ॥ 23 ॥

संक्लेशव्यवदानेषु [xxxx ⏑ – ⏑ x ।
xxxx ⏑ ]योक्ता वा तद्वा [xx ⏑ – ⏑ x] ॥ 24 ॥

[xxx]मुपपन्नार्थं श्रुत्वैव सनरामरः ।
पृथक् प्रचलितः [–x xxxx ⏑ ]लेन्द्रवत् ॥ 25 ॥

[xxxx ⏑ – – x] सर्वास्वेव प्रवृत्तिषु ।
भिन्नासूच्चावचत्वेन कःस्वित् कर्ता भविष्यति ॥ 26 ॥

स्वातन्त्र्ये सति कर्ता स्यात् क्वचित्तच्च न युज्यते ।
इत्युक्तः [x ⏑ – – x xxxx ⏑ ]यस्त्वया ॥ 27 ॥

अयं स शून्यतासिंहनादास्फोटितदुन्दुभिः ।
धर्मः सदेवके लोके[xxxx ⏑ – ⏑ x] ॥ 28 ॥

येनावभासिते लोके प्रभयेव विवस्वतः ।
गतमत्यन्तदौर्भाग्यं ततोऽन्यत् सर्ववाङ्मयम् ॥ 29 ॥

**वर्णार्हवर्णे बुद्धस्तोत्रे वाग्विशुद्धिर्नाम पञ्चमः परिच्छेदः ॥ 5 ॥**

●

# 6. अविवादस्तवः

सर्वधर्मा अनात्मानः क्षणिकं सर्वसंस्कृतम् ।
शान्तं निर्वाणमित्येषा धर्ममुद्रा त्रिलक्षणा ॥ 1 ॥

अगम्या सर्ववादानामभेद्या स्थापिता त्वया ।
ब[xx]क्त्वा हि को लोकस्वभावमतिवर्त्स्यति ॥ 2 ॥

क इतीतिकया वादे कृत[x]क[⏑–⏑x] ।
तथतामन्यथा कर्तुं शक्तः शीतामिवोष्णताम् ॥ 3 ॥

अप्येवाप्रतिघे व्योम्नि कश्चिदुत्पादयेद् व्रणम् ।
न त्वस्यां धर्ममुद्रायां सहधर्मेण कश्चन ॥ 4 ॥

तच्चैतत् कृष्णमहतोः प्रसिद्धमपदेशयोः ।
तवैव धर्मतत्त्वज्ञ वादे नान्यस्य वादिनः ॥ 5 ॥

विवादपतिते लोके पृथग्दृष्टिव्यपाश्रयात् ।
अविवादपदस्थानमेकस्त्वमवबुद्धवान् ॥ 6 ॥

पश्यन् रूपाणि चक्षुष्मानन्धेषु विवदत्स्वपि ।
यथा विवादं नोपैति सैव बालैस्तवोपमा ॥ 7 ॥

न धर्मवादिनो वादस्तवास्ति सह केनचित् ।
सद्वादित्वान्न विद्वद्भिर्नाविद्वद्भिरनादरात् ॥ 8 ॥

अनाभासं गताः कामा दृष्टिजालं प्रदालितम् ।
अथामूलः कुतोमूलो विवादस्ते भविष्यति ॥ 9 ॥

किं धीरा विवदिष्यन्ति त्वादृशा जितकाशिनः ।
को विवादः सहस्रांशोः शवेन तमसा सह ॥ 10 ॥

प्रतिवातं रजो याति परा[xx ◡ ‐ ◡ x] ।
न वादास्त्वयि रोहन्ति कशाघाता इवाम्बरे ॥ 11 ॥

प्रज्ञप्तिपतितो लोकस्त्वं यथाभूतगोचरः ।
अतो विपर्यासगतैर्बहुभिर्न समेति ते ॥ 12 ॥

वितथाभिनिविष्टानां त्वयानभिनिवेशिना ।
अय[xx ◡ ‐ ‐ x xx] संस्यन्दना कुतः ॥ 13 ॥

आसादयन्तो बालास्त्वा नाथं हित[◡ ‐ ◡ x]म् ।
अनासाद्यमविज्ञानात् क्षिण्वन्त्यात्मानमात्मना ॥ 14 ॥

वरमात्मात्मनाक्षिप्ता ज्वालामालाकुले तले ।
दुरासदा[◡ ‐ ‐ x xx] चासादिता जिनाः ॥ 15 ॥

वादेनाकलयित्वा त्वा प्रत्याहूताः [◡ ‐ ◡ x] ।
[xxxx ◡ ‐ ‐ x] शङ्कुगाढाङ्किता इव ॥ 16 ॥

भग्नासु वादिदंष्ट्रासु सात्यके सदसि त्वया ।
पतितानीव शृङ्गानि सर्वेषां परवादिनाम् ॥ 17 ॥

[xxxx] निवर्तन्ते संसीदन्त्यपरेऽभितः ।
अपरे संनतिं यान्ति त्वां प्राप्य परवादिनः ॥ 18 ॥

सद्धर्मामृतधाराभिरभिवृष्टास्त्वयापरे ।
आराधयन्ति सद्धर्मं संपन्नसमुदागमाः ॥ 19 ॥

हा तमस्विनि दुर्मूढे हा जालिनि [◡ ‐ ◡ x] ।
हाहंकार वृथाकार हा नाथ करुणात्मक ॥ 20 ॥

एभिस्त्रिभिरसद्धर्मैरिदमाकुलितं जगत् ।
स्रोतसा विषमेणेव त्वन्मतादपकृष्यते ॥ 21 ॥

अतोमूलाः प्रतायन्ते दृष्टिद्वैधापथादयः ।
सर्वोपक्लेशसंक्लेशाः पृथङ्मार्गान्तरायिकाः ॥ 22 ॥

न त्वद्धर्मरसाभिज्ञः परवादेषु सज्जते ।
कलविङ्करुताभिज्ञो वायसानां रुतेष्विव ॥ 23 ॥

धर्मव्याजमुपेत्यापि ये ते वाग्गोचरं गताः ।
तदुष्ट्रमधुतां तेषां गतं यत्किञ्चनाशिनाम् ॥ 24 ॥

ऋतं गमकमन्वर्थमाशयानुगुणं मितम् ।
सप्रातिहार्यमेकान्तमहासामर्थ्यमव्ययम् ॥ 25 ॥

सारवत् साररसवत् पर्यायवदुपायवत् ।
परिपूर्णमसंकीर्णमोजस्वि च यशस्वि च ॥ 26 ॥

कोऽसावेवंगु[--x xx]य वचनं तव ।
तद्विपर्ययपूतीनि परवाक्यानि ग[⏑x] ॥ 27 ॥

सुखं वा यदि वा दुःखं [xxxx⏑–⏑x] ।
परिवर्ज्यं तदित्युक्तं प्रतिषेव्यं विपर्ययात् ॥ 28 ॥

इतीष्टानिष्टसेवायां तवानेकांशवादिनः ।
पदवीमनुयास्यन्ति कथमेकांशवादिनः ॥ 29 ॥

इदमर्थिकता येयं [xx]कारं प्रति त्वया ।
देशिता सैव सीमालं त्वद्वादपरवादयोः ॥ 30 ॥

न विषामृतयोरेवं न प्रकाशान्धकारयोः ।
प्रकृष्टमन्तरं यद्वत् त्वद्वादपरवादयोः ॥ 31 ॥

न स्वर्गापाययोरेवं न सुधापूतिमुक्तयोः ।
विदूरमन्तरं यद्वत् त्वद्वादपरवादयोः ॥ 32 ॥

वाग्वस्तुमात्रामेवासावयं पदपदार्थवान् ।
व्याख्यातमन्तरं तेन त्वद्वादपरवादयोः ॥ 33 ॥

यदस्ति तव तेषां च वादिनां सुगतान्तरम् ।
तदेवोच्चावचत्वेन त्वद्वादपरवादयोः ॥ 34 ॥

असंप्रधार्यमेवैतद् भवमोक्षान्तरं यथा ।
तदन्तरं महावीर त्वद्वादपरवादयोः ॥ 35 ॥

यत् प्रवृत्तिनिवृत्त्योर्यत् संक्लेशव्यवदानयोः ।
तदेव जिन नानात्वं त्वद्वादपरवादयोः ॥ 36 ॥

इहैकान्तयथातत्त्वं मोषधर्मः स केवलः ।
किमन्यदस्तु नानात्वं त्वद्वादपरवादयोः ॥ 37 ॥

अयमेकान्तकल्याणः स एकान्तान्तरायिकः ।
विमात्रतास्तु कातोऽन्या त्वद्वादपरवादयोः ॥ 38 ॥

तत्र लिप्तोपलिप्तानामिह शुद्धिर्विधीयते ।
एतदेवान्तरं नाथ त्वद्वादपरवादयोः ॥ 39 ॥

असत्प्रलापास्ते सर्व इदमेकं सुभाषितम् ।
धृतं बलाबलं तेन त्वद्वादपरवादयोः ॥ 40 ॥

**वर्णार्हवर्णे बुद्धस्तोत्रे अविवादस्तवो नाम षष्ठः परिच्छेदः ॥ 6 ॥**

●

# 7. ब्रह्मानुवादः

प्रवृत्तौ च निवृत्तौ च प्रकृतिर्जगतोऽस्य वा ।
यां सर्वे नातिवर्तन्ते पृथग्लोकाः सदेवकाः ॥ 1 ॥

प्रतिलोमानुलोमा सा द्विद्वादशपदा त्वया ।
सद्धर्मसवितर्द्धर्मसावित्री संप्रकाशिता ॥ 2 ॥

त्रिष्टुप् सैवाङ्गवैकल्यादेकस्मिन्नौपपादिके ।
भवे यथास्वमङ्गेऽङ्गे चतुर्धा परिवर्तिता ॥ 3 ॥

पुनः सैवाङ्गसाकल्याज्जगती द्वादशाक्षरैः ।
पादैः सत्यनयेनैव पूर्ववत् परिवर्तिता ॥ 4 ॥

एतत् त्रिपवणं ब्रह्म ये यथावदुपासते ।
ब्रह्मीभवन्ति ते ब्रह्मन् ब्राह्मणास्तव शासने ॥ 5 ॥

ब्राह्मण्यं ब्राह्मणाश्चैव ब्राह्मण्यफलमेव च ।
ब्राह्मण्यार्थश्च सुब्रह्मन् नान्यत्र तव शासनात् ॥ 6 ॥

न ब्राह्मण्यादृते कश्चिद् ब्राह्मणो नाम विद्यते ।
न चायमाञ्जसो मार्गः क्वचिदन्यत्र विद्यते ॥ 7 ॥

विद्याचरणसम्पन्नं ब्राह्मणा ब्राह्मणं विदुः ।
ता विद्याश्चरणं तच्च नान्यत्र तव शासनात् ॥ 8 ॥

शैक्ष्याशैक्ष्यौ हि ता विद्याश्चरणं च तदावहत् ।
न चास्या धर्मवर्तिन्या नामाप्यन्यत्र विद्यते ॥ 9 ॥

भवन्ति यदवक्रम्य सर्वे वर्णा द्विजातयः ।
त्वया तदमृतद्वारं चिरावृतमपावृतम् ॥ 10 ॥

कुदृष्टिविमतिग्रस्तो ब्राह्मणः किं भविष्यति ।
न चेमे ग्रन्थयोऽन्यत्र च्छिद्यन्ते त्वन्मतादृते ॥ 11 ॥

ब्राह्मणा ब्रह्मणः पुत्रा औरसा मुखजा इति ।
प्रसृतो लोकवादोऽयं त्वयि साफल्यमागतः ॥ 12 ॥

त्वं ब्रह्मा प्रतिपद् ब्राह्मी त्वयि त्वं ब्राह्मणर्षभः ।
प्रणेता चोपनेता च त्वमृत्विक् त्वं पुरोहितः ॥ 13 ॥

न त्वया संस्कृतः कश्चिद् भवति ब्राह्मणोऽशुचिः।
न चोपनीतो ब्राह्मण्यात् पतति ब्राह्मणः पुनः ॥ 14 ॥

त्रीणि ब्राह्मणसत्यानि त्रिविधं ब्राह्मलक्षणम् ।
त्रीणि ब्राह्मणगोत्राणि ब्राह्मणप्रवरास्त्रयः ॥ 15 ॥

न हि ब्राह्मणसामीची न ब्राह्मी प्रतिपत् क्वचित्।
न ब्राह्मण[ ⏑ – – ] धर्मा अन्यत्र तव शासनात् ॥ 16 ॥

यावत्सुभाषितं लोके सर्वं तत् तव शासनात् ।
सुगतावेणिकैवैषा निरवद्याभिलापिता ॥ 17 ॥

ये त्वदन्ये तु दृश्यन्ते वाक्कर्मणि निरत्यये ।
सर्वे ते सर्वधर्मज्ञ त्वत्सूक्तविघसाशिनः ॥ 18 ॥

इतो बाह्येषु यत् सूक्तं घुणाक्षरवदीक्ष्यते ।
तत् तत्रातुल्यजातीयं जातरूपमिवायसि ॥ 19 ॥

कः श्रद्धास्यति तत् तस्मिन् पूर्वापरपराहतम् ।
न्यस्तमेरण्डगण्डेषु गोशीर्षमिव चन्दनम् ॥ 20 ॥

पाकपाण्डूनि निम्बेषु सहकारफलानि यः ।
श्रद्दध्यात् तन्मयानीति स बाह्येषु सुभाषितम् ॥ 21 ॥

न सुभाषितरत्नानामस्मिँल्लोके सदेवके ।
मलयाच्चन्दनस्येव त्वदन्यत्रास्ति संभवः ॥ 22 ॥

**वर्णार्हवर्णे बुद्धस्तोत्रे ब्रह्मानुवादो नाम सप्तमः परिच्छेदः ॥ 7 ॥**

●

# 8. उपकारस्तवः

कदाचित् कर्हिचिद् येन यान्ति विक्रान्तगामिनः ।
तूष्णीमल्पोत्सुकाः खड्गशृङ्गकल्पाः स्वयंभुवः ॥ 1 ॥

प्रणाशपथबाहुल्यात् तावद् दुरभिसंभवः ।
त्वया निर्वाणमार्गोऽसौ महाराजपथीकृतः ॥ 2 ॥

महानागैरिव स्वैरमपि क्षुण्णः कुमारकैः ।
स्त्रीजनेनापि यदसौ द्व्यङ्गुलाबलबुद्धिना ॥ 3 ॥

अप्रमेयप्रभावस्य सा बुद्धावेणिकस्य ते ।
देशनाप्रातिहार्यस्य व्युष्टिर्व्युष्टिमतां वर ॥ 4 ॥

विविधैरुपदष्टानां संक्लेशविषदूषिभिः ।
त्वमावेणिकसामान्यप्रतिपक्षागदाकरः ॥ 5 ॥

कामरागादिदग्धानामशुभाभावनादयः ।
गदागदविधानेन त्वया धर्माः प्रकाशिताः ॥ 6 ॥

ब्रुवता मार्गसंभारान् धर्मान् कुशलसास्रवान् ।
अभ्यन्तरमिथोभेदो भावानां जनितस्त्वया ॥ 7 ॥

तेऽप्युपक्लेशदुष्टत्वात् सामान्याकारताडिताः ।
संतर्जनोल्मुकानीव ज्ञानाग्नावेव ते हुताः ॥ 8 ॥

प्राग् बोधेर्देशिता धर्माः प्रवृत्तिसुखहेतवः ।
ततो बोधिमनुप्राप्य निवृत्तिसुखहेतवः ॥ 9 ॥

न बुद्धत्वेऽपि ते नोक्ता धर्माः कुशलसास्रवाः ।
निर्वाणोपनिषत्त्वे तु प्रायेण परिणामिताः ॥ 10 ॥

कास्ता विपत्तयो याभ्यस्त्वया नाभ्युद्धृतं जगत् ।
का वा संपत्तयः सन्ति या लोकोऽयं न लम्भितः ॥ 11 ॥

विमतिग्रन्थयश्छिन्ना भग्ना दुर्दृष्टिकण्टकाः ।
तृष्णाविषलता दग्धा सर्वं क्रोधविषं हतम् ॥ 12 ॥

अविद्यापटलं विद्धं पातिता मानकेतवः ।
चेतःखिलानि भिन्नानि विनिबन्धा विघाटिताः ॥ 13 ॥

सर्वे विश्लेषिता ग्रन्था ओघेषु स्थापिताः प्लवाः ।
यन्मूलं स्रोतसां तानि शोषितानि सरांसि ते ॥ 14 ॥

वङ्कदोषकषायाणां निगूढाशयशायिनाम् ।
संक्लेशविषवृक्षाणां मूलान्युन्मूलितानि ते ॥ 15 ॥

पिथिताः कापथाः सर्वे विपर्यासासमञ्जसः ।
अमृतैकायनः श्रीमान् ऋजुर्विवृत आञ्जसः ॥ 16 ॥

अष्टाभ्यो दम्यदोषेभ्यो निर्हृत्यान्ये निवेशिताः ।
इष्टाष्टाङ्गोप[प]न्नासु भद्राजानेयपङ्क्तिषु ॥ 17 ॥

उद्धृत्यामेध्यजाम्बालात् संक्लेशक्रिमिसंकुलात् ।
अक्लिष्टाष्टाङ्गसंपन्ने प्लाविता विमलेऽम्भसि ॥ 18 ॥

हृतं दौःशील्यदौर्गन्ध्यं दत्तं शीलानुलेपनम् ।
ह्रीव्यवत्राप्यवसनैर्निर्मलैरवगुण्ठिताः ॥ 19 ॥

सद्धर्माभरणैः शुभ्रैर्भ्राजिष्णुभिरलङ्कृताः ।
निषादिता महार्हेषु ध्यानसिंहासनेषु च ॥ 20 ॥

कीर्णा बोध्यङ्गकुसुमैरनास्रवसुगन्धिभिः ।
धर्मप्रीतिरसैरार्यैर्नीतास्तृप्तिं निरामिषाम् ॥ 21 ॥

निष्क्रीयानादिकालीनात् तृष्णादास्याद् बहुच्छलात् ।
अत्यन्तनिरपभ्रंशि नीताः पुत्रत्वमात्मनः ॥ 22 ॥

प्रत्येकबोधेरायत्यामपरे भाजनीकृताः ।
अभिषिक्ता महायानयौवराज्येऽपरे वरे ॥ 23 ॥

सर्वधर्मपदाभिज्ञः सर्वार्थपदकोविदः ।
सर्वभाषाविभागज्ञः सर्वादृक्प्रतिभानवान् ॥ 24 ॥

महाकरुणया कृत्स्नमालिङ्ग्येव जगत् स्थितः ।
अहं व इत्यनाथानां सानाथ्यमवघोषयन् ॥ 25 ॥

महाकारुणिकः शास्ता दयावाननुकम्पकः ।
तत्परश्चाकिलासी च कस्त्वयास्ति समोऽपरः ॥ 26 ॥

नाथस्त्वं सर्वसत्वानां सामान्यो भद्रबान्धवः ।
नोपैति नाथवत्तां तु जनस्तेनावसीदति ॥ 27 ॥

न नाथकरकान् धर्मांस्त्वदन्यो वेद कश्चन ।
यान् समादाय सानाथ्यमन्तप्राप्तोऽपि गच्छति ॥ 28 ॥

बाह्याङ्गबलसाकल्यं सम्यक् संपादितं त्वया ।
आध्यात्मबलवैकल्याद् बाला व्यसनभागिनः ॥ 29 ॥

यथा मीमांस[– –x xxxx ⏑–⏑x] ।
यथा हीनाधिमुक्तित्वं बहवः [x⏑–⏑x] ॥ 30 ॥

[xxxx ⏑– –x xxxx⏑–⏑x ।
xxxx ⏑– –x xxxx⏑–⏑x] ॥ 31 ॥

[xxxx]तमोभू[x xxxx ⏑–⏑x] ।
अपायमयमेव[x xxxx ⏑–⏑x] ॥ 32 ॥

[xxxx ◡ – –x xxxx ◡ ]देशिकाः ।
उत्पद्येर[ ◡ –]लोके त्वादृशा भद्रबान्धवाः ॥ 33 ॥

परतः प्रतिपत्तिः सा येन ते त्रिविध[ ◡ x ।
xx] मित्रारिमध्येषु सुहृदेवानुकम्पकः ॥ 34 ॥

**वर्णार्हवर्णे बुद्धस्तोत्रे उपकारस्तवो नामाष्टमः परिच्छेदः ॥ 8 ॥**

## 9. अप्रतीकारस्तवः

तवैवैकस्य सकला प्रतिसंस्तरधर्मता ।
परानुग्रहवृत्तौ तु शेषः पाल्लविको जनः ॥ 1 ॥

तावका येऽपि दृश्यन्ते सन्तः संग्रहवस्तुषु ।
तेऽप्यसाकल्य[--x xxxx ⏑-⏑x] ॥ 2 ॥

प्राणान्तिकस्ते भगवन्नामिषप्रतिसंस्तरः ।
विगताचार्यमुष्टिश्च सद्धर्मप्रतिसंस्तरः ॥ 3 ॥

[xxxx ⏑--]सि प्रतिसंस्तरकर्मणः ।
तवासि[x⏑--x xxx] सर्वसम्पदाम् ॥ 4 ॥

परोपघात[--x xxxx ⏑-] जगत् ।
त्वं तु लोकव्यवस्थात्तां प्रति[xx⏑-⏑x] ॥ 5 ॥

[xxxx ⏑--x xxxx⏑-⏑x ।
xxxx ⏑--x xxxx⏑-⏑]कः ॥ 6 ॥

प्र[xxx ⏑--x xxxx⏑-⏑x ।
xxxx ⏑--x xxxx⏑-⏑x] ॥ 7 ॥

[xxxx ⏑--x xxxx⏑-⏑x ।
xxxx ⏑--x]मीलितानीतराणि च ॥ 8 ॥

[xxxx ⏑--x xxxx⏑-⏑x ।
xxxx ⏑--x] देशनायास्तवोपमा ॥ 9 ॥

क[xxx ⏑-]र स्यादप्रमेयोपकारिणि ।
परा[xx⏑--x] यदा सर्वाः प्रवृत्तयः ॥ 10 ॥

न [xxx ⌣ – – x xxxx ⌣ – ⌣ x ।
xxxx ⌣ – – ]न्ते जगद्धितसुखावहम् ॥ 11 ॥

बुद्धनिःश्वास[ – – x xxxx ⌣ – ⌣ x ।
xxxx ⌣ – – x] प्रसीदति जनस्त्वयि ॥ 12 ॥

[xxxx ⌣ – – x] बुद्धनिःश्वासवीजिताः ।
अपास्य विषयान् दिव्यान् [xxx] विनयोन्मुखाः ॥ 13 ॥

[xxxx ⌣ – – x x]द्धर्मश्रवणं प्रति ।
आतस्त्वमेव[ – ] तृप्तस्तर्पयन् परमार्थतः ॥ 14 ॥

सर्वे त्वामुपजीवन्ति सन्तो वृष्टिमिव प्रजाः ।
[xxx – ]सोऽस्ति यद्यदुपजीव्यं भवेत्तव ॥ 15 ॥

[xxxx ⌣ ] श्रद्धातुम[xxx ⌣ – ⌣ x] ।
जिघांसुष्वपि ते नाथ यथारूपो हिताशयः ॥ 16 ॥

मनोरथानामपि ता भूमीः [xx ⌣ – ⌣ x ।
xxxx ⌣ – – x] श्रेयसो द्विषतामपि ॥ 17 ॥

प्रतिवेत्स्यन्ति ये केचिदुपकाररसाग्रताम् ।
तावकास्ते भविष्यन्ति धर्मदायादबान्धवाः ॥ 18 ॥

[xxxx ⌣ ]मी सत्त्वास्त्वद्गतं करुणाशयम् ।
हृदं [xx ⌣ – – x] विशेयुस्तव शासनात् ॥ 19 ॥

यस्मात्तु नावगच्छन्ति स्फुटा मारेण वैरिणा ।
तस्मादात्म[ ⌣ – – x] बालास्त्वच्छासनातिगाः ॥ 20 ॥

चिरं बत भविष्यन्ति त्वच्छासनपराङ्मुखाः ।
महाप्रपातान्धकारपरिदाहानुभाविनः ॥ 21 ॥

आभवाग्रमपि स्पृष्ट्वा त्वद्धर्मविमुखो जनः ।
आचिनोत्येव मोहान्धो व्यसनप्रभवान् भवान् ॥ 22 ॥

अनागम्यापि तु ध्यानं मौलं त्वच्छासनानुगाः ।
विवर्तयन्त्येव भवान् [xxx] वशवर्तिनः ॥ 23 ॥

तत्पूर्वं पुष्पकेतोस्ते पातिताः पुष्पकेतवः ।
ततो मानध्वजास्तुङ्गाः क्लेशमारस्य पातिताः ॥ 24 ॥

अप्राप्यैव त्वया बोधिं कामधात्वीश्वरो जितः ।
बोध्यानन्तर्यमार्गेण जितो धातुत्रयेश्वरः ॥ 25 ॥

त्वमेवेश्वर लोकेऽस्मिन् रथयूथपयूथपः ।
रथातिरथसंख्या तु का क्लेशविजिते जने ॥ 26 ॥

न त्वच्छूरतरोऽस्त्यन्यो नोग्रसंग्रामजिन्नरः ।
स्वपरोभयसंतानाद् योऽजैषीर्मारवाहिनीम् ॥ 27 ॥

**वर्णार्हवर्णे बुद्धस्तोत्रे अप्रतिकारस्तवो नाम नवमः परिच्छेदः ॥ 9 ॥**

# 10. शरीरैकदेशस्तवः

[xxxx ◡ – –] ये त्रयस्ते नेत्रयोर्गुणाः ।
सात्रयोऽपि त्रयो लोका न [xx]नुगता गु[x] ॥ 1 ॥

उत्तरोऽनुत्तरो लक्ष्म्या [xxxx]धरोऽधरः ।
अनुत्तरा ह्युभययोर्भूतभौतिकसंपदः ॥ 2 ॥

कस्योपर्युत्तरस्तिष्ठेत् कस्य स्यादधरोऽधरः ।
न ह्यन्योऽन्यमृते किञ्चिदनयोर्मिथ[– ◡ x] ॥ 3 ॥

अहो सुजातं मैथुन्यमहो संधिरनुत्तरः ।
तवान्योन्यानुरूपोऽयमोष्ठयोर्गोष्ठयोः श्रियः ॥ 4 ॥

क्व चेयम[◡ –] लक्ष्मीर्दीप्तताम्रप्रभावतोः ।
क्व बिम्बफलसंध्याभ्ररक्तोत्पलरुचः शवाः ॥ 5 ॥

देशनाकालचलयोरचञ्चलपटुत्वयोः ।
ईषदालक्ष्यमाणान्तर्दन्तचन्द्रोदयश्रियोः ॥ 6 ॥

पुष्पाणीवावकिरतोर्वर्णान् स्व[x ◡ – –x ।
xxxx ◡ – –x] गतिमार्गोपकारिणः ॥ 7 ॥

चारुविस्पन्दितं दृष्टं यैः[xxx]दयोस्तव ।
तैश्चक्षूंषि [◡ – –x] तेषां सफल[– ◡ x]म् ॥ 8 ॥

नैव मुक्तावडी नाथ न कुन्दकुमुदावडी ।
नेन्दुपादावसिक्ताङ्गी हिमवच्छिखरावडी ॥ 9 ॥

न विहङ्ग[◡ – –]का शरत्सलिलहासिनी ।
न शरच्चन्द्रलेखापि व्यभ्राम्बरविराजिनी ॥ 10 ॥

सितप्रभावदातां ते दान्त दन्तावडीमिमाम् ।
लेशांशेनाप्यनुप्राप्ता दीपाभा भानुभामिव ॥ 11 ॥

किं हि वज्राङ्कुरावड्या वस्त्वस्याः समतां [ ⏑ – ] ।
धर्मामृतरसासेकवासिताया विशेषतः ॥ 12 ॥

कुन्देन्दुकुमुदादीनां शौक्ल्योदाहरणाश्रयः ।
त्वद्दन्तपङ्क्त्यभ्युदयादधिकारादिव च्युतः ॥ 13 ॥

अस्या ह्यभ्युदयाल्लोके सर्वद्रव्याण्यशेषतः ।
मलिनानीव जातानि शुक्लानि रुचिराणि च ॥ 14 ॥

प्रभूताधरयोर्येयमन्तरा ते निरन्तरा ।
शमावगमयोर्मध्ये विमुक्तिरिव शोभते ॥ 15 ॥

अभिभूतमवेक्ष्येदं जगद् दशनमालया ।
जितमित्युच्छ्रिता दंष्ट्राः पताका इव ते श्रिया ॥ 16 ॥

समानुवृत्ता दंष्ट्रास्ते रुचिरा निशिताः सिताः ।
अवनाम्योपमाः सर्वा ज्वलन्त्य इव विष्ठिताः ॥ 17 ॥

चन्द्रकोटी कुटिलका यल्लोके व्यक्तिमागता ।
अजिह्मरुचिराङ्गाभिस्तद् दंष्ट्राभिः कृतं तव ॥ 18 ॥

लेखावस्थस्य दंष्ट्राभिः पूर्णस्य वदनश्रिया ।
ललाटेनार्धबिम्बस्य व्यामया परिवेषिणः ॥ 19 ॥

सर्वाः सर्वास्ववस्थासु भ्रंशिता गुणसंपदः ।
मुनीन्द्रचन्द्र चन्द्रस्य त्वद्रूपगुणसंपदा ॥ 20 ॥

प्रदक्षिणैरेकरुहैरुन्मुखैः कोमलामलैः ।
स्निग्धैः सान्द्रेन्द्रनीलाभैरसंसक्तैरजिह्मगैः ॥ 21 ॥

सुराम्भोरुहगर्भाभमङ्गं ते सुगताङ्गजैः ।
विभाति खचितं सूक्ष्मै रत्नकुण्डलकैरिव ॥ 22 ॥

यत् ते पुरुषनागस्य नागावेणिकलक्षणम् ।
अत्यन्तमनुपक्लिष्टं यद् बाह्याभ्यन्तरैर्मलैः ॥ 23 ॥

गु[xxx ⏑ – ]द्यत्तदङ्गं ते स्वङ्ग संगतम् ।
शुद्ध[xx ⏑ – – x xxxx ⏑ – x]म् ॥ 24 ॥

सर्वाजानेयमुख्यानां वङ्क्षणान्तरचारुताम् ।
स्व[x]कु[x ⏑ – – x xx]क्रम्य [ ⏑ – ]स्थितम् ॥ 25 ॥

ब्रह्मच[x ⏑ – – x] संस्थानस्य च[ – ⏑ ]नात् ।
कोपीनमपि सन्नाथ यदकोपीनमेव ते ॥ 26 ॥

कारुण्यात् काङ्क्षतां यत् ते निमित्तान्तरलेशतः ।
आविष्कृतं सु[ – – x] मेघच्छिद्रेन्दुबिम्बवत् ॥ 27 ॥

कम्पयित्वेव निष्कम्प्य ह्रीव्यपत्राप्यपर्वतम् ।
यच्चक्षुर्बुद्धिविषयं महाकरुणया कृतम् ॥ 28 ॥

ईष[xx ⏑ – – x x] तन्मन्दाकिनीरुहाम् ।
केसरावर्तचारुत्वं यद् वराङ्गस्य ते गुरो ॥ 29 ॥

लक्ष्मीवत् पूर्णचन्द्रे स्यादावर्तो यदि संस्थितः ।
[xxx] ते वराङ्गस्य पूरयेन्नोपमापदम् ॥ 30 ॥

किं हि पुण्यशतोदारकर्मनिर्माणचारुणः ।
तदन्यचेतनाक्षिप्तं पदवीमनुयास्यति ॥ 31 ॥

सुप्रतिच्छन्नमपि सत् स्वकोशाम्बरसंवरैः ।
प्राकाश्यमुपयातीव शेषलक्षणसंपदा ॥ 32 ॥

तद् वराङ्गं वराङ्गस्य शिरसावनतस्तव ।
मनसाभिप्रसन्नेन वचसा चापि पूजये ॥ 33 ॥

अग्र्ये प्रसादनीयानामसेचनकदर्शने ।
त्वयि चेत् प्रतिघातोऽस्ति धिगन्धमधमं तमः ॥ 34 ॥

**वर्णार्हवर्णे बुद्धस्तोत्रे शरीरैकदेशस्तवो नाम दशमः परिच्छेदः ॥ 10 ॥**

# 11. प्रभूतस्तवः

यथाधात्ववतिष्ठन्ते सत्त्वानामधिमुक्तयः ।
मम तावत् प्रभूतायां प्रभूततर आशयः ॥ 1 ॥

शिरसा मनसा वाचा कः प्रभूतां न पूजयेत् ।
माता प्रवचनस्यास्य येयं कृत्स्नस्य रत्नसूः ॥ 2 ॥

अनुत्तराणां सर्वेषामनुत्तरतरैव मे ।
प्रभूता प्रतिभातीयं करणानां तव प्रभो ॥ 3 ॥

धर्माधिकारप्राप्तत्वाज्जगत्प्रथितशासना ।
सर्वेषां लक्षणानां हि राज्ञीव धुरि विष्ठिता ॥ 4 ॥

परकाङ्क्षाविघातार्थं या मुखादभिनिर्हृता ।
शरत्संध्याभ्रलेखेव वक्त्रचन्द्रावघाटिनी ॥ 5 ॥

किमद्भुततरं तस्मादेवं पृथ्वी सती सती ।
मुखे दशनसंबाधे यदसंबाधशायिनी ॥ 6 ॥

अनूनमेतत् कल्याण्याः सौकुमार्यमृदुत्वयोः ।
अप्रमेयप्रभावायाः प्रभावोऽस्या भविष्यति ॥ 7 ॥

द्रवजाम्बूनदाकारदीप्तताम्रप्रभावती ।
मुखे जलदनिर्घोषे विद्युन्मालां करोति ते ॥ 8 ॥

आधिराज्यमिवाक्रम्य शिक्षासौष्ठवसंपदः ।
स्वैरमास्ये चरति ते स्थानान्तरविलासिनी ॥ 9 ॥

इयं तान्यनवद्यानि वाक्पुष्पाणि प्रमुञ्चति ।
येषां सौगन्ध्यमाघ्राय पुष्पवादीति गीयसे ॥ 10 ॥

अत एव स्रवति तन्निकाममधुरं मधु ।
यस्यासि जिन सौरस्यान्मधुवादीति विश्रुतः ॥ 11 ॥

अत्रैव प्रतिबद्धं तदववादानुशासनम् ।
यत्प्रभावात् प्रभाव्यन्ते त्वादृशा अमृतप्रदाः ॥ 12 ॥

अनया तत्कृतं साध्व्या स्वखेदनिरवेक्षया ।
धर्मचक्रं प्रवर्त[x] येन लोके सदेवके ॥ 13 ॥

अस्याः स महिमा येन लोकोऽयमवभासते ।
सुभाषितशताकीर्णो रत्नप्रकरवानिव ॥ 14 ॥

विधात्री सर्वधर्माणां युक्तमुक्ताभिलापिनी ।
कल्पद्रुमलतेवार्या नानारत्नफलप्रदा ॥ 15 ॥

सर्वज्ञतोपगूढायाः प्रतिभाप्रतिसंविदः ।
कः प्रभूतामृते लोके प्रतिभाभारमुद्वहेत् ॥ 16 ॥

यान् यानेव हि ते धर्मान् संभूयास्यै प्रयच्छतः।
तानियं कुसुमानीव ग्रन्थयत्यकिलासिनी ॥ 17 ॥

सतीं सर्वज्ञतां कस्ते को महाकरुणां सतीम् ।
कः सतोऽन्यान् गुणान् विद्याद् यदीयं न प्रकाशयेत् ॥ 18 ॥

न हि सन्तः प्रकाश्यन्ते त्वादृशा देशनामृते ।
देशना च प्रभूतायां न्याये सिद्धिरिवाश्रिता ॥ 19 ॥

वक्ति नानविधान् धर्मानत्ति नानाविधान् रसान्।
न च द्यौरिव पङ्केन रसरागेण लिप्यते ॥ 20 ॥

तूष्णींभावानुकूलापि वक्तुमप्यकिलासिनी ।
उभयोर्धर्मयोरेका सभागा विसभागयोः ॥ 21 ॥

नोत्कण्ठते स्थिता तूष्णीं देशयन्ती न खिद्यते।
आजानेयतया साध्वी सर्वत्रसमवाहिनी ॥ 22 ॥

अहो गोचरचारित्वमहो न्यायैकतानता ।
सर्वं वक्तुं च यच्छक्ता धर्ममेव च भाषते ॥ 23 ॥

भौतिकेन च पुण्येन धर्माख्यानमयेन च ।
अनुत्तराभ्यां बौद्धाभ्यां गन्धाभ्यां नित्यवासिता ॥ 24 ॥

चाक्षुषेण च शुभ्रेण पुण्यश्लोकमयेन च ।
द्वाभ्यामपि प्रकाशाभ्यां वर्णाभ्यां दिक्षु विश्रुता ॥ 25 ॥

धन्यानि तानि चक्षूंषि चक्षुष्मन्तश्च ते जनाः ।
दृष्टा सर्वानवद्याङ्गी यैरियं निर्हृता मुखात् ॥ 26 ॥

ते तु धन्यतमाः सन्तो यैरस्या वाक्यचातुरम् ।
श्रोत्राञ्जलिपुटैः साक्षात् पीतं द्रवमिवामृतम् ॥ 27 ॥

वर्णानलङ्करोतीव वर्णैर्मण्डयतीव गाम् ।
आदेयतरतां प्रोक्ता मुखं गमयतीव ते ॥ 28 ॥

लोकालङ्कारभूतस्य वक्त्रचन्द्रस्य ते मुने ।
भूयोऽलङ्कारभूतेव स्वसौष्ठवगुणादियम् ॥ 29 ॥

वर्णसंस्थानसौशब्द्यसौकुमार्यप्रभावतः ।
न प्रभूतासमं रूपि द्रव्यं पश्यामि किं चन ॥ 30 ॥

यदि सा रूपिणी काचिदस्ति देवी सरस्वती ।
इयं सर्वानवद्याङ्गी प्रभूता सा भविष्यति ॥ 31 ॥

सर्वे वैरस्यमायान्ति ध्वनयो दिव्यमानुषाः ।
प्रभूतायां प्रवृत्तायामाहन्तुं धर्मदुन्दुभिम् ॥ 32 ॥

त्वं वक्ता करणं चेदं वाक्यं चेदमनुत्तरम् ।
त्र्यङ्गोऽयमगद [-x] सर्वक्लेशविषापहः ॥ 33 ॥

**वर्णार्हवर्णे बुद्धस्तोत्रे प्रभूतस्तवो नामैकादशमः परिच्छेदः ॥ 11 ॥**

●

## 12. भवोद्वेजकः स्तवः

न त्वया सदृशं क्षेत्रं त्रिषु लोकेषु विद्यते ।
अग्र्यस्त्वं दक्षिणीयानां पङ्क्तिपावनपावनः ॥ 1 ॥

न विपाकव्यवस्थास्ति त्वयि कारापकारयोः ।
अपर्यन्तस्य नभस आयामव्यामयोरिव ॥ 2 ॥

तेऽपि तावदवभ्रष्टा ये माध्यस्थ्यं गतास्त्वयि ।
अप्रमेयान्धतामिस्रे का कथा व्युत्थिते जने ॥ 3 ॥

यथा नोत्कर्षपर्यन्तं तस्य पश्यामि कर्मणः ।
अनुत्तरे दक्षिणीये या सम्यक्प्रतिपत् त्वयि ॥ 4 ॥

तथापकर्षपर्यन्तं तस्य नावैमि कर्मणः ।
त्वयि मिथ्याप्रवृत्तिर्या सम्यक्प्रतिपदन्तगे ॥ 5 ॥

अ[xx]भ्रष्ट[--]दां धिगनार्यामनित्यताम् ।
सर्वाकारबलोपेते त्वय्यपि प्रहृतं यया ॥ 6 ॥

अहो संसारदौरात्म्यमहो निर्वाणशान्तता ।
त्वादृशोऽपि वशी यत्र निगतः करुणात्मकः ॥ 7 ॥

नानागतभयं नोक्तं न नेत्री न प्रवर्तिता ।
न चतस्रः परिषदो वैशारद्यं न लम्भिताः ॥ 8 ॥

न महाकाश्यपानन्दप्रमुखाः कृतबुद्धयः ।
गुप्तये न समादिष्टाः कल्याणस्यास्य [–⏑x] ॥ 9 ॥

निमीलिते [⏑––x xxxx]कचक्षुषि ।
सत्यालोकेऽपि लोकोऽयं तमसेवावगुण्ठितः ॥ 10 ॥

कामं ख[x⏑––x xx] सुगत सौगतम् ।
त एव चेमे सत्पुत्राः शैक्षाशैक्षास्त्वदौरसाः ॥ 11 ॥

त्वदृते तु जगन्नाथ गतमर्थान्तरं परम् ।
प्रसन्नग्रहताराङ्कं नभः शून्यमिवेन्दुना ॥ 12 ॥

निवृत्तमण्डपेयेन म्लायमानगुणौजसः ।
जनितव्रणदोषस्य कल्पान्तरमतान्तरैः ॥ 13 ॥

गता प्रवचनस्यास्य त्वदृते व्युष्टिरन्यताम् ।
हृतनागस्य सरसः श्रीरिवाचिरनाशिनी ॥ 14 ॥

कस्य दीप्तासिकल्पेभ्यो भवेभ्यो न भयं भवेत् ।
विचिन्त्य परिनिर्वाणं बुद्धानां वशवर्तिनाम् ॥ इति ॥ 15 ॥

**वर्णार्हवर्णे बुद्धस्तोत्रे भवोद्वेजको नाम द्वादशमः परिच्छेदः समाप्तः**
**कृतिराचार्यमातृचेटस्य ॥ 12 लिखितः ॥**

●